श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री सम्पत्तैय्यन्गार् विरचितं

# ॥ श्री श्रीनिवासाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासाष्टकम् ॥

गुणैः प्रवरधीबलप्रभृतिभिस्त्वमेव प्रभुः
प्रयासगतिगोचरं श्रुतिशिरस्सु यद्दैवतम्।
त्वमेव सुलभोऽधुना वृषगिरौ सदा श्रीनिधिः
तदेव शरणं नृणां मम च देशिको नायकः॥ 1 ॥

क्षमापतिरपि श्रिया समनुपाल्य सर्वं जगत्
त्वमेव बहुधा भवन् सदिति देव नाम्ना श्रुतः।
ऋचिप्रथममण्डले तदनु षष्ठके च्छन्दसि
गिरीशकमलासनप्रकृतिवैभवैरूह्यसे॥ 2 ॥

श्रियःपतिरपारधीपरिसरेषु संदृष्यसे
शमादिगुणभूषिते मनसि योगिनां पूरुषः।
सहस्रनयनादिभिः पुरुषसूक्त उद्घोषितः
कथं नु तव वैभवं विधिशिवादयो लेभिरे॥ 3 ॥

रमापतिरहो मम प्रथितवैभवो देशिकः
समानमतिदूषितं स्ववपुषा हि संभावयन्।
प्रमाणगतिगोचरः श्रुतिशिरस्सु राराजसे
कथं नु भवसागरात्तव कृपां विना तारये॥ 4 ॥

पिता पतिरसौ भवान् समयसङ्गतिस्थापितः
नृशंस इति को वदेत् कथमतुल्यसम्मोहकं।
रमादयितमच्युतं चरणपङ्कजे संश्रितं
इमं जनमकिञ्चनं कुमतिषद्वदं रक्ष माम्॥ 5 ॥

कुमारगिरिशाहिपास्तव शरीरदेशे स्थिताः
    त्वमेव त इति भ्रमप्रचयतो नु तल्लक्षणं।
अनूह्य बहवो जनाः परिसरन्ति मोहान्धकाः
    विगाह्य गहनं परं समनुसृत्य नष्टा ध्रुवम्॥ 6॥

अमूर्तिमपि ते प्रियं परमभूर्तमार्तप्रियं
    उमापति सरस्वतीपति पतिस्त्वमेको विभुः।
श्रुतिस्मृतिसमन्वये निरुपधिप्रमाणैस्तथा
    बुधाः पदमवाप्य ते समधिजग्मुरापद्धनम्॥ 7॥

गुणेश गुरुभक्तितस्त्वयि समाप्य सप्रश्रयं
    जिहासति रतिं भवे भवति पुष्टधीमान्नरः।
विरक्तिसमतोलनं त्वयि रतिं मतिं गच्छति
    विमुक्तिपथि सञ्चरन्नमृतमश्नुते ह्यन्तिमे॥ 8॥

॥ श्री श्रीनिवासाष्टकं समाप्तम्॥